# 2023

## SANSKRIT — HONOURS

**Paper : DSE-B-4**

**(Veda)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

विशेषोल्लेखं विना सर्वेषां प्रश्नानामुत्तरं **संस्कृतभाषया देवनागरीलिप्या** च प्रदेयम्।

**Section – A**

**Unit : I**

**(Marks : 10)**

1. अधोदत्तेषु प्रश्न***पञ्चकं*** समाधेयम्। 2×5

(a) सायणाचार्येण कस्य वेदस्य भाष्यं प्रथमं विरचितम्? तेन कृतस्य ऋग्भाष्यस्य नाम लेख्यम्।

(b) तैत्तिरीयसंहितायाः प्राचीनतमो भाष्यकारः कः? तदीयभाष्यस्य नाम किम्?

(c) सायणपूर्वभाविनः वेदभाष्यकारद्वयस्य नाम लेख्यम्।

(d) माधवविरचितायाः सामसंहितायाः टीकायाः नाम किम्? सा केन प्रकाशिता?

(e) भूतात्त्विकदिशा वेदं व्याख्यायतां मध्ये कस्यचन भारतीयस्य नाम सग्रन्थं लेख्यम्।

(f) सत्यव्रतसामश्रमिणा कस्य ब्राह्मणस्योपरि प्रस्तावना विरचिता? तस्याः नाम किम्?

(g) महीधरविरचितस्य भाष्यस्य नाम किम्?

**Unit : II**

**(Marks : 25)**

2. अधोदत्तयोः यथेच्छम् ***एकः प्रश्नः*** समाधेयः।

(a) क आसीत् हरिश्चन्द्रः? केन परामृष्टः स कां देवताम् आराध्य पुत्रं लेभे? तस्य पुत्रस्य नाम किम्? स कथं केन रोगेण आक्रान्तोऽभवत्? पाठ्यानुसारेण विशदम् आलोच्यताम्। 1+2+1+1+7

(b) विश्वामित्रस्य कति पुत्रा आसन्? तेषु कैः भ्रातृरूपेण शुनःशेपः स्वीकृतः? वैश्वामित्रे वंशे शुनःशेपस्य किं नाम अभवत्, कथञ्च? विश्वामित्रानुसारिणः पुत्रान् प्रति विश्वामित्रस्य आशीर्वादः पाठ्यानुसारेण आलोच्यताम्। इतरेषां पुत्राणां का आसीत् परिणतिः? 1+2+2+5+2

3. अधोदत्तेषु ***एकः*** व्याख्येयः। 8×1

(a) यावन्तः पृथिव्यां भोगा, यावन्तो जातवेदसि।
यावन्तो अप्सु प्राणिनां भूयान् पुत्रे पितुस्ततः।।

(b) आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठ
शेते निपद्यमानस्य चराति चरतो भगश्चरैवेति।।

(c) तस्मा उपाकृताय नियोक्तारं न विविदुः।

4. निम्नोद्धृतयोः ***एकतरस्य आङ्गलभाषया वङ्गभाषया*** वा अनुवादः कार्यः। 5×1

(a) स पितरमेत्योवाच-तत हन्ताहमनेनाऽत्मानं निष्क्रीणा इति। स वरुणं राजानमुपससारानेन त्वा यज इति; तथेति, भूयान् वै ब्राह्मणः क्षत्रियादिति वरुण उवाच; तस्मा एतं राजसूयं यज्ञकर्तुं प्रोवाच, तमेतमभिषेचनीये पुरुषं पशुमालेभे।

(b) चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम्।
सूर्यस्य पस्य श्रेमाणं यो न तन्द्रयते चरंश्चरैवेति।।

**Section – B**

**Unit – I**

**(Marks : 25)**

5. अधःप्रदत्तयोः ***एकतरस्य*** उत्तरं लेखनीयम्।

(a) तैत्तिरीयोपनिषद् कस्मिन् वेदे आम्नाता? तस्यां वल्लीसंख्यामुल्लिख्य तासां नामानि लेख्यानि। तत्र शीक्षास्वरुपं पाठ्यानुसारं वर्ण्यताम्। 1+1+3+7

(b) अध्ययनसमापनान्ते शिष्यान् प्रति आचार्यस्य उपदेशाः पाठ्यानुसारेण विव्रियन्ताम्। 12

6. यथाभिमतम् ***एकतमो*** व्याख्येयः। 8×1

(a) यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात् सम्बभूव।

(b) एतास्तिस्रो व्याहृतयः।

(c) पाङ्क्तं वा इदं सर्वम्।

7. अधोलिखितयोः ***एकतरस्य आङ्गलभाषया वङ्गभाषया*** वा अनुवादः कार्यः। 5×1

(a) ओमिति ब्रह्म। ओमितीदं सर्वम्। ओमित्येतदनुकृतिर्ह स्म वा अप्यो श्रावयेत्याश्रावयन्ति। ओमिति सामानि गायन्ति। ओम् शोमिति शस्त्राणि शंसन्ति।

(b) शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः।

## Unit – II

**(Marks : 5)**

8. अधोलिखितयोः ***कस्यचिदेकस्य आङ्गलभाषया वङ्गभाषया*** वा अनुवादः कार्यः। 5×1

(a) एतेषु यश्चरते भ्राजमानेषु
यथाकालं चाहुतयो ह्याददायन्।
तं नयन्त्येताः सूर्यस्य रश्मयो
यत्र देवानां पतिरेकोऽधिवासः॥

(b) तस्मै स विद्वानुपसन्नाय सम्यक्
प्रशान्तचित्ताय शमान्विताय।
येनाक्षरं पुरुषं वेद सत्यं
प्रोवाच तां तत्वतो ब्रह्मविद्याम्॥